PAPER - 6

# MT

**Seat No.** | | | | | | | |

**2017 .... .... 1200**

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - II**
**PAPER - VI**

**Time : 2 Hours** **(Pages 6)** **Marks : 40**

## प्रथमः विभागः - गद्यम् ।

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि द्वे कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १
ग्राहकन्यायालयं गन्तुं ग्राहकस्य अधिकारः यतः ........ ।
(सः विक्रेयवस्तुविषये असन्तुष्टः/सः विक्रेतारं प्रति क्रोधी)

(ii) पूर्णवाक्येन उत्तरत । शाकविक्रेतुः समीपे किं नास्ति ? १

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १
पाषाणखण्डस्य उपयोगः विधियुक्तः ।

| | |
|---|---|
| माता | - अम्ब, नैष सम्यक् तोलयति । तोलनार्थं सम्यक् परिमाणमपि न योजयति । परिमाणस्थाने पाषाणखण्डं योजयति । |
| माता | - मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम् । तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम् ? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि । |
| मधुरा | - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः । |
| माता | - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (१९७४) संवत्सरे स्थापिता एषा संस्था । 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः शाकविक्रेता | - यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय। |

**२. स्वमतप्रकटनम् ।**

यदि त्वं वस्तुविक्रेत्रा वञ्चितः भवसि तर्हि किं करोषि ? इति माध्यमभाषया लिखत । २

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

द्वितीयेन युवकेन रसायनं न निर्मितं यतः ........ ।

(सः अज्ञानी आसीत् । / रुग्णसेवाकारणात् सः समयं न अलभत ।)

(ii) कः कं वदति । १

कथमिदानीम् अभाषमाणः तिष्ठसि ?

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

नागार्जुनः सुविख्यातः वैद्यः अस्ति ।

> आसीत् पुरा सुविख्यातो नागार्जुनो नाम रसायनशास्त्रज्ञः चिकित्सकश्च । तस्य सेवाव्रतिनः कीर्तिः देशविदेशेषु प्रसृता । एकदा राजानं गत्वा नागार्जुनः प्रार्थयामास, ''महाराज, कार्यबाहुल्याद् मत्कृते सहायकस्य आवश्यकता वर्तते ।'' एतच्छ्रुत्वा द्वितीये दिने एव तं प्रति महाराजः द्वौ युवानौ प्रेषितवान् । तौ परीक्षितुं नागार्जुनः उभाभ्यामपि एकैकं वस्तु दत्त्वा अवदत्, ''इदं गृहीत्वा स्वगृहं गच्छतम् । श्वः तस्मात् किमपि रसायनम् औषधं वा निर्मीय आनयतमिति ।'' अथ अपरेद्युः उभौ तौ नागार्जुनं प्रति आगतवन्तौ । तदा तयोरेकः उक्तवान्, ''महाशय, अहं रसायनं कृत्वा आनीतवान् । पश्यतु भवानिति ।'' द्वितीयं शान्तचेतसं दृष्ट्वा नागार्जुनेन पृष्टं, ''कथमिदानीम् अभाषमाणः तिष्ठसि ? किं त्वया नानीतं रसायनम् ?'' तदाकर्ण्य स मन्दस्वरेण अगदत्, ''आचार्य, ह्यः गच्छन्तौ पथि आवामेकं रुग्णमपश्याव । तस्यावस्थां वीक्ष्य तं झटिति रुग्णालयं नेयमिति मत्वा अहं तं नीतवान् । तस्य समीपे स्थित्वा सेवां कृतवान् । अतः समयाभावाद् रसायनं निर्मातुं नाशक्नवमिति ।''

**२. पृथक्करणम् ।** २

**द्वितीययुवकस्य कार्याणि ।**

[ ] → [ ] → [ ] → [ ]

(रुग्णालयं नीतवान्, रुग्णमपश्यत्, रसायनं न निर्मितवान्, रुग्णसेवां कृतवान्)

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १

१) विश्वम्, भुवनम्, जगत्, संवत्सरम् ।

२) प्रयासः, वर्षम्, प्रयत्नः, यत्नः ।

(ii) गद्यांशात् द्वे विशेष्ये चित्वा लिखत ।

सुवर्णम् → [ ], [ ]

(iii) गद्यांशे आगते द्वे धातुसाधित-अव्यये चित्वा लिखत । १

स्वातन्त्र्यपूर्वकालादेव क्रीडामेतां वैश्विकस्तरं नेतुं प्रथमप्रयासः कृतः महाराष्ट्रेणैव । शून्यपञ्चनवैकतमे - (१९५०) ख्रिस्ताब्दे अखिल-भारतीय-कबड्डी-सङ्घटनायाः स्थापना समजायत । भारतीय ऑलिम्पिक-क्रीडासमित्या अष्टपञ्चनवैक (१९५८) तमे ख्रिस्तवर्षे एषः क्रीडाप्रकारः ऑलिम्पिक वैश्विक - क्रीडास्पर्धासु निवेशितः । शून्यनवनवैक (१९९०) तमे संवत्सरे बीजिङ्गनगरे आयोजितायाम् ऑलिम्पिक-स्पर्धायां चीनदेशेनापि एषा क्रीडा स्वीकृता । तदनन्तरं कबड्डीक्रीडायाः सुवर्णयुगमेवावतरितम् । बीजिङ्गनगरे समायोजितायाम् ऑलिम्पिकस्पर्धायां भारतदेशेन सुवर्णपदकं विजितम्, कबड्डीक्रीडायामेव । अनेन सुवर्णपदकेन आशियाई - स्पर्धायाः कबड्डीक्रीडायां सातत्येन त्रिवारं सुवर्णपदकं प्राप्य विश्वविक्रमः प्रस्थापितो भारतदेशेन । अधुना भारतदेशे तथैव जपान-पाकिस्तानादिषु आशियादेशेषु एषा क्रीडा क्रीड्यते, एवमेषा लोकप्रियापि सञ्जाता ।

२. **पृथक्करणम् ।**

**क्रमसंयोजनं कुरुत ।** २

(i) 'कबड्डी' इति क्रीडाप्रकारः ऑलिम्पिक-वैश्विकक्रीडास्पर्धासु निवेशितः ।

(ii) अखिल-भारतीय-कबड्डीसङ्घटनायाः स्थापना सञ्जाता ।

(iii) कबड्डीक्रीडायाः सुवर्णकालः प्रारभत ।

(iv) चीनदेशः कबड्डीक्रीडा ऑलिम्पिकस्पर्धायां स्वीकृतवान् ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ॥१॥
माऽस्तु धनं मौक्तिकं काञ्चनम् अस्तु अविरतं तव प्रसादनम् ।
त्वत्स्पर्शान्मे भवतु सुवर्णं गुरुचरणाभ्यां सदा वन्दनम् ॥२॥

१. **शब्दज्ञानम् ।** १

(i) सुवर्णम् शब्दस्य कृते श्लोके आगतः पर्यायशब्दः अस्ति ............ ।

(ii) विध्वंसः तथा विनाशः शब्दस्य कृते श्लोके आगतः विलोमशब्दः अस्ति ............. ।

२. **पृथक्करणम् । (स्तम्भपूरणं कुरुत ।)** २

| शिष्यः | गुरुः |
|---|---|
| | |

(कुम्भकारः, मृत्तिका, मूर्तिकारः, पाषाणः)

**प्र.२ ब) पद्यांशौ पठित्वा निर्दिष्टे कृती कुरुत ।**

कालज्ञः समयज्ञश्च सदा वश्यश्च नोद्धतः।
अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः ।।१।।
एवमेव यदा विद्वान् मन्यतेऽतिबलं रिपुम् ।
संश्रयेद् वैतसीं वृत्तिमेतत् प्रज्ञानलक्षणम् ।।२।।

**१. अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

कीदृशः वेतसः न अभ्येति ?

**२. तात्पर्यलेखनम् / स्पष्टीकरणम् ।** २

वैतसीवृत्तिविषये माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**श्लोकपूर्तिं कुरुत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) साम्नैव ....... पटोलेन ।।

(ii) शस्त्रैर्हता० ....... हन्ति ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | | |
|---|---|---|
| (i) | पञ्चैते गृहिणा पोष्या | जननी जनकस्तथा । |
| (ii) | शनैः शनैश्च भोक्तव्यं | हेलया न कदाचन । |
| (iii) | अतिथिर्बालकः पत्नी | इतरे च स्वशक्तितः । |
| (iv) | रसायनमिव प्राज्ञैः | नद्यस्तत्र न वेतसम् । |

## तृतीयः विभागः - व्याकरणम् ।

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | पञ्चमी एकवचनम् | सप्तमी बहुवचनम् | प्रथमा एकवचनम् |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(अस्मासु, निवासी, भवत्याः, कार्यालयेषु, सर्वम्, वस्तुनः)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | वर्तमानकालः | आज्ञार्थः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

(उद्भवेत्, भविष्यन्ति, विराजते, आप्नोतु, जगाम, आसीत्)

**इ) समासाः । कोष्ठकपूर्तिं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | समस्तपदम् | विग्रहः | नाम |
|---|---|---|---|
| (i) | अश्वाधिरूढा | अश्वम् अधिरूढा । | ........ |
| (ii) | अहर्निशम् | ........ । | समाहार द्वन्द्व समास |
| (iii) | न्यायप्रासादः | ........ । | चतुर्थी तत्पुरुष समास |
| (iv) | सुमार्गः | शोभनः मार्गः । | ........ |
| (v) | निर्गुणः | निर्गताः गुणाः यस्मात् सः । | ........ |
| (vi) | काशीनगरम् | ........ । | कर्मधारय समास |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) एष क्रीडाप्रकारः ........ कृतेऽपि प्रचलितोऽस्ति । ( महिलानाम् / महिलासु / महिला )

(ii) आर्यचाणक्यः ........ दूरं एकस्मिन् उटजे न्यवसत् । ( नगरम् / नगरस्य / नगरात् )

(iii) मधुरा माता च ........ गच्छतः । ( आपणम् / आपणे / आपणात् )

(iv) ........ समीपे शाला अस्ति ( उद्यानम् / उद्यानस्य / उद्यानात् )

(v) अलं ........ । ( चिन्ता / चिन्ताम् / चिन्तया )

(vi) सैनिकाः देशं ........ रक्षन्ति । ( शत्रुभिः / शत्रुभ्यः / शत्रूणाम् )

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) ....... + ईशः = वागीशः ।

(ii) तनुः + ....... = तनुरग्रभागः ।

(iii) एतत् + ...... = एतच्छ्रुत्वा ।

(iv) भूत्वा + एव = ....... ।

(v) ....... + अद्य = अप्यद्य ।

(vi) असौ + ....... = असावनुचितः ।

**ऊ) सङ्ख्यावाचकविशेषणानि । रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) श्रावणमासे ........ तिथौ कृष्णजन्म भवति । ($8^{th}$)

(ii) सप्ताहस्य ........ अहं मन्दिरं गच्छामि । (thrice)

(iii) शाकुन्तलस्य ........ अङ्कः अतीव सुन्दरः अस्ति । ($4^{th}$)

(iv) सङ्गीते ........ स्वराः भवन्ति । (7)

(v) नवरात्रं नाम ........ रात्रीणां समाहारः । (9)

(vi) मया ........ अपि विदेशयात्रा न कृता । (once)

**चतुर्थः विभागः - लेखनकौशल्यम् ।**

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| सर्वे | जले | गायन्ति |
| मत्स्याः | छात्रेषु | दृश्यन्ते |
| सिंहाः | गीतं | स्निह्यति |
| अध्यापकः | वने | तरन्ति |

**आ) परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा ४ रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

अहमेको छात्रोऽस्मि। मम अभिधानं प्रहर्षोऽस्ति। अहं दिल्लीनगरस्य ........ प्रतिष्ठिते विद्यालये दशम्यां कक्षायां पठामि । अहं स्वगृहात् प्रातरेव सप्तवादने विद्यालयस्य ........ पठितुं गच्छामि । विद्यालयस्य परिश्रमिणः ........ मां श्रद्धया पाठयन्ति । छात्राः समयानुसारं स्वकल्याणार्थं ........ प्राप्नुवन्ति, स्वजीवने च सफलाः भवन्ति ।

(मार्गदर्शनम्, एकस्मिन्, शिक्षकाः, वाहनेन)

**Best of Luck**